(652) "डीङ् विहायसा गतौ" (IV-दिवादिः-1135. अक. सेट्. आत्म.)

स्वादिः ।

"विहायसां गतौ डीङो डयते डीयते पदे ॥" (श्लो. 20) इति देवः ।

डायकः-यिका, डायकः-यिका, डिडयिषकः-षिका, डेडीयकः-यिका ;
डयिता-त्री, डाययिता-त्री, डिडयिषिता-त्री, डेडीयिता-त्री ;

इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकडीङ् (651) धातुवत् बोध्यानि । अस्य दिवादौ पाठात् डीयमानः इति शानचि श्यन् भवति । निष्ठायाम्-[A]डीनः, डीनवान् ; इति रूपे भवतः । अस्य स्वादिषु पाठसामर्थ्यात् 'स्वादय ओदितः' (ग. सू. दिवादिः) इति ओदित्त्वातिदेशात् 'ओदितश्च' (8-2-45) इति निष्ठानत्वं भवति । अस्य धातोः उदात्तत्वेऽपि स्वादिषु पाठसामर्थ्यात् निष्ठायाम् इडभावो बोध्यः । यदि इडागमः स्यात् तेन व्यवधानान्नत्वं न भवेत् । ततश्च स्वादिपाठो विफलः स्यात् ।

(653) "ढौकृ गतौ" (I-भ्वादिः-98. सक. सेट्. आत्म.)

ढौककः-किका, ढौककः-किका, [1]डुढौकिषकः-षिका, [2]डोढौककः-किका ;
ढौकिता-त्री, ढौकयिता-त्री, डुढौकिषिता-त्री, डोढौकिता-त्री ;
—— ढौकयन्-न्ती, ढौकयिष्यन्-न्ती-ती ; ——
ढौकमानः, ढौकयमानः, डुढौकिषमाणः, डोढौक्यमानः ;
ढौकिष्यमाणः, ढौकयिष्यमाणः, डुढौकिषिष्यमाणः, डोढौकिष्यमाणः ;
ढौकृ-ढौग्-ढौकौ-ढौकः ; —— —— ——
ढौकितम्-तः, ढौकितः, डुढौकिषितः, डोढौकितः-तवान् ;
ढौकः, [3]ढौकनः, ढौकः, डुढौकिषुः, डोढौकः ;

---

1. सनि द्वित्वे, अभ्यासस्य, 'एच इग्घ्रस्वादेशे' (1-1-48) इत्यनेनान्तरतम्या-दौकारस्य उकाररूपः ह्रस्वः । एवं सन्नन्ते सर्वत्र ज्ञेयम् ।

2. यङन्तात् ण्वुलि, अभ्यासस्य ह्रस्वे, 'गुणो यङ्लुकोः' (7-4-82) इति गुणः । एवं यङन्ते सर्वत्र ज्ञेयम् ।

3. 'अनुदात्तेतश्च हलादेः' (3-2-148) इति ताच्छीलिको युच् ।

A. 'किं सूयसे गिरमदून नितान्तदीना-
मुड्डीनकाकसम भूपतिधीनमेतत् ।' धा. का. 2.58.